# राजस्थान बोर्ड परीक्षा 2019-20
# 10वीं कक्षा
# तृतीय भाषा-संस्कृतम्
# मॉडल पेपर-सप्तम्

**समय : 3.15 घंटे** **(पूर्णांक : 80)**

**परीक्षार्थियों के लिये सामान्य निर्देश :-**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत-माध्यमेन एव लेखनीयानि।

---

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

कस्मिंश्चिद् कूपे गङ्गदत्तो नाम मण्डूकः प्रतिवसति स्म। स कदाचिद् दायादैः उद्वेजितः अरघट्टघटीम् आरुह्य निष्क्रान्तः। अथ तेन चिन्तितं यत् "कथं तेषां दायादानां मया प्रत्यपकारः कर्त्तव्यः?" एवं चिन्तयन् बिले प्रविशन्तं प्रियदर्शनाभिधं कृष्णसर्पमपश्यत्। तं दृष्ट्वा भूयोऽप्यचिन्तयत् यत् "एनं तत्र कूपे नीत्वा सकलदायादानाम् उच्छेदं करोमि।"

**उत्तरम् :**

**प्रसंग-** प्रस्तुत गद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'यो यद्वपति बीजं हि लभते तादृशं फलम्' शीर्षक पाठ से उद्धृत है। इस पाठ में वर्णित कथा मूलतः पंचतन्त्र के चतुर्थ तन्त्र 'लब्धप्रणाश' से संकलित है। इसमें एक मेंढक व सर्प की कथा के द्वारा शिक्षा दी गई है जो जैसा बीज होता है वह वैसा ही फल प्राप्त करता है। प्रस्तुत अंश में गंगदत्त नामक मेंढक द्वारा अपने आत्मीय जनों से अपमानित होकर प्रतिशोध की भावना से उनका विनाश कराने के लिए एक सर्प को अपने निवास पर लाये जाने का वर्णन हुआ है।

**हिन्दी-अनुवाद-** किसी कुएँ पर गङ्गदत्त नामक मेंढकों का राजा रहता था। वह कभी अपने कुटुम्बियों के द्वारा परेशान होकर रहट में प्रयुक्त किये जाने वाले ढोल में चढ़कर वहाँ से निकल गया। इसके बाद उसने विचार किया कि किस प्रकार उन कुटुम्बियों के अपकार का बदला चुकाया जावे? इस प्रकार विचार करते हुए उसने बिल में प्रवेश करते हुए प्रियदर्शन नामक काले सर्प को देखा। उसको देखकर पुनः विचार किया कि इसको (सर्प को) वहाँ कुएँ पर ले जाकर सभी कुटुम्बियों का विनाश करता हूँ।

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद! धर्मं चर। स्वाध्यायान्मा प्रमदः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्याय-प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्। मातृदेवो भव! पितृदेवो भव! आचार्यदेवो भव! अतिथिदेवो भव!

**उत्तरम् :**

**प्रसंग-** प्रस्तुत गद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'आचार्योपदेशः' शीर्षक पाठ से उद्धृत है। मूलतः यह पाठ 'तैत्तिरीयोपनिषद्' की शिक्षा-वल्ली से संकलित है। इस पाठ में प्राचीन कालीन गुरुकुल प्रणाली में विद्या-समाप्ति के बाद छात्र के समावर्तन संस्कार (दीक्षान्त-समारोह) के अवसर पर आचार्य द्वारा शिष्य को दिये जाने वाले उपदेश का वर्णन है।

**हिन्दी-अनुवाद-** वेदादि शास्त्रों को पढ़ाकर गुरु शिष्य को उपदेश देता है। सत्य बोलो। धर्म (कर्त्तव्य) का आचरण करो। स्वाध्याय (नियमपूर्वक अध्ययन-मनन) से प्रमाद मत करो। सत्य से प्रमाद नहीं करना चाहिए। धर्म (कर्त्तव्य) से प्रमाद नहीं करना चाहिए। आत्म-रक्षण-कर्त्तव्य से प्रमाद नहीं करना चाहिए। ऐश्वर्य-दायक कर्म से प्रमाद नहीं करना चाहिए। नियमपूर्वक स्वाध्याय और प्रवचन में प्रमाद (आलस्य) नहीं करना चाहिए। देवकार्य एवं पितृकार्यों में प्रमाद नहीं करना चाहिए। माता, पिता, गुरु और अतिथि को देवता के समान मानकर तुम्हें उनकी उपासना (सेवा-सत्कार) करनी चाहिए।

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

दुःखसागरे तरणीयम्
कष्टपर्वते चरणीयम्।
विपत्तिविपिने भ्रमणीयम्
लोकहितं मम करणीयम्।।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत पद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'लोकहितं मम करणीयम्' शीर्षक पाठ से लिया गया है। इस पद्य में दुःखों, कष्टों एवं विपत्तियों में विचलित न होकर लोक-कल्याण के लिए हमेशा कर्म करने की प्रेरणा दी गई है। कवि कहता है कि-

**हिन्दी-अनुवाद-** दुःख रूपी समुद्र में तैरना चाहिए, कष्टरूपी पर्वत पर विचरण करना चाहिए, विपत्ति रूपी वन में भ्रमण करना चाहिए तथा मुझे लोक-कल्याण करना चाहिए।

**अथवा**

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

वन्दे नितरां भारतवसुधाम्।
दिव्यहिमालय–गङ्गा–यमुना–सरयू–कृष्णाशोभितसरसाम्।।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत पद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'भारत–वैभवम्' शीर्षक पाठ से लिया गया है। मूलतः यह पाठ श्रीजी महाराज द्वारा रचित 'भारत–भारती–वैभवम्' नामक ग्रन्थ से संकलित है। इस पद्यांश में कवि हिमालय पर्वत, गंगा, यमुना आदि नदियों से सुशोभित भारत–भूमि की वन्दना करते हुए कहता है कि–

**हिन्दी–अनुवाद–** मैं देवतास्वरूप हिमालय तथा गंगा, यमुना, सरयू, कृष्णा जैसी नदियों से सुशोभित भारत–भूमि की निरन्तर वन्दना करता हूँ।

**3.** अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 4

न जातु दुःखं गणनीयम्
न च निजसौख्यं मननीयम्।
कार्य–क्षेत्रे त्वरणीयम्
लोकहितं मम करणीयम्।।

**उत्तरम् :**

**प्रसङ्ग–** प्रस्तुतपद्यम् अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'लोकहितं मम करणीयम्' इतिशीर्षकपाठाद् उद्धृतम्। अस्मिन् पद्ये कविना संस्कृतगीतमाध्यमेन कदापि स्वस्य सुखदुःखयोः गणना न कृत्वा लोकहिताय कार्यकरणस्य प्रेरणा प्रदत्ता।

**संस्कृत–व्याख्या–** कविः कथयति यत् मया कदापि दुःखस्य गणना न कर्त्तव्या, तथा च स्वस्य सुखस्य विषये एव मननं न कर्त्तव्यम्। कर्मक्षेत्रे तु शीघ्रता कर्त्तव्या, तथा सदैव लोक–कल्याणं कर्त्तव्यम्।

**विशेषः–** अत्र प्रेरणा प्रदत्ता यत् वयं कदापि स्वस्य दुःखस्य गणना न कुर्मः, सुखस्य च मननं न कुर्मः, अपितु सदैव स्वकर्त्तव्यस्य लोकहितस्य च चिन्तनं कुर्मः।

**अथवा**

**3.** अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 4

राष्ट्रस्योत्थानपतने राष्ट्रियानवलम्ब्य हि।
भवतस्सर्वदा तस्माच्छिक्षणीयास्तु राष्ट्रियाः।।

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतपद्यम् अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'स्वराष्ट्र–गौरवम्' इतिशीर्षकपाठाद् उद्धृतम्। अस्मिन् पद्ये राष्ट्रस्य विकासाय राष्ट्रियान् शिक्षयितुं प्रेरयन् कविः कथयति यत्–

**संस्कृत–व्याख्या–** राष्ट्रस्य जनान् आश्रित्य एव सदैव राष्ट्रस्य (देशस्य) उन्नतिः अवनतिः च भवतः, अस्मात् कारणात् राष्ट्रिया जना सर्वदा राष्ट्रभक्तेः शिक्षया शिक्षणीयाः। अर्थात् राष्ट्रस्य जनेभ्यः राष्ट्र–भक्तेः शिक्षा प्रदातव्या।

**विशेषः–** अत्र राष्ट्रकल्याणाय विकासाय च राष्ट्रीयभावनायाः शिक्षा सर्वेषां कृते आवश्यकी भवतीति प्रतिपादितम्।

**4.** अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 3

**भामाशाहः** – (प्रसन्नमुखः प्रणम्य) महाराज! इयती एव स्वल्पतमा यद् अनया द्वादशवर्षाणि यावत् पञ्चविंशतिसहस्रसैनिकाः सहर्षं योद्धं शक्नुवन्ति।

**प्रतापः** – अहो! तदा तु किं कथनीयम् महत्कार्यं सेत्स्यति अनया। (सर्वान् सम्बोध्य) अद्य अस्मात् एव क्षणात् राणा स्वदेशस्य पारतन्त्र्य–शृंखलाः त्रोटयितुं शत्रून् संहारयितुं धर्मं रक्षितुं च योत्स्यते, योत्स्यते अवश्यं योत्स्यते! (भामाशाहम् अभिलक्ष्य) धन्योऽसि मित्र! धन्यः। एहि त्वां गाढम् आलिङ्गितुम् अभिलषामि।

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'स्वदेशं कथं रक्षेयम्' इतिशीर्षकपाठाद् उद्धृतः। पाठोऽयं डॉ. नारायणशास्त्री कांकरेण विरचिता एकांकी वर्तते। अकबरेण सह युद्धं कुर्वन् प्रतापः धनाभावे सैन्यशक्त्याभावे च खिन्नः भूत्वा स्वदेशं परित्यक्तुं समुद्यतः भवति। तस्मिन्नेवावसरे मेवाड़मन्त्री भामाशाहः तत्रागत्य स्वकीयां विपुलां धनराशिं देशस्य स्वतन्त्रतायै प्रतापं समर्पयति। प्रतापश्च पुनः स्वतन्त्रतायै योद्धम् दृढ़प्रतिज्ञां करोतीति वृत्तान्तं अत्र वर्णितम्।

**संस्कृत–व्याख्या–**

**भामाशाहः** – (प्रसन्नतापूर्वकं प्रणामं कृत्वा) हे महाराज! अस्यां तु इयती अल्पतमा राशिः वर्तते यद् अनया सम्पत्या द्वादशवर्षपर्यन्तं पञ्चविंशतिसहस्रसैनिकाः प्रसन्नतया युद्धं कर्तुं प्रभवन्ति।

**प्रतापः** – अहो! तदा तु किं वक्तव्यम्? अनया सम्पत्या महत्कार्यं समपन्नं भविष्यति, (सर्वान् सहचरान् सम्बोधनं कृत्वा) अधुना अस्मादेव क्षणात् अयं महाराणा प्रतापः स्वस्य देशस्य परतन्त्रतायाः बन्धनं भग्नं कर्तुम्, रिपून् विनाशयितुम्, धर्मस्य संरक्षणार्थञ्च युद्धं करिष्यति, युद्धं करिष्यति, अवश्यमेव युद्धं करिष्यति। (भामाशाहं दृष्ट्वा) धन्योऽसि सुहृद्! धन्योऽसि! आगच्छतु, अहं भवतः गाढ़ालिंगनं कर्तुमिच्छामि।

**विशेषः–** अत्र भामाशाहस्य उदारता, विनम्रता, दानशीलता देशभक्तिश्च प्रकटिता।

**अथवा**

**4.** अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु– 3

**द्वितीया** – सुव्रते, न शक्य एष वाचामात्रेण विरमयितुम्। गच्छ त्वम् मदीये उटजे मार्कण्डेयस्य ऋषिकुमारस्य वर्णचित्रितो मृत्तिकामयूरस्तिष्ठति, तमस्योपहर।

**प्रथमा** – तथा। (इति निष्क्रान्ता)

**बालः** – अनेनैव तावत् क्रीडयिष्यामि। (इति तापसीं विलोक्य हसति)

**तापसी** – भवतु, न मामयं गणयति। (पार्श्वमवलोक्य) कोऽत्र ऋषिकुमाराणाम्? (राजानमवलोक्य) भद्रमुख, एहि तावत्! मोचयानेन डिम्भलीलया बाध्यमानं बालमृगेन्द्रम्!

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये' इतिशीर्षकपाठाद् उद्धृतः। मूलतः पाठोऽयम् 'अभिज्ञानशाकुन्तलस्य' सप्तमांकात् संकलितः। अंशेऽस्मिन् सिंहशावकेन सह क्रीडारतस्य बालकस्य चञ्चलतायाः तेन सह तापसः च वार्तालापं वर्णितम्–

**संस्कृत–व्याख्या–**

**द्वितीया तापसी –** हे सुव्रते! अयं बालकः वाणीमात्रेण विरमयितुं समर्थः नास्ति। भवती गच्छतु, मम कुटीरे ऋषिपुत्रस्य मार्कण्डेयस्य वर्णैः चित्रितः मृण्मयूरः वर्तते, तं मृण्मयूरम् अस्य कृते आनयतु।

**प्रथमा तापसी –** भवतु। (इति कथयित्वा ततः गच्छति)

**बालकः –** तावत्पर्यन्तं अनेन सिंहशावकेनैव सह क्रीडां करिष्यामि। (इति कथयित्वा तापसीं दृष्ट्वा हसति)

**तापसी –** अस्तु, एषः मम कथनं न स्वीकरोति। (समीपं दृष्ट्वा) अत्र ऋषिपुत्रेषु कोऽपि असित किम्? (नृपं दृष्ट्वा) हे श्रेष्ठमुख! इतः आगच्छतु! अनेन बालक्रीडया पीड्यमानं सिंहशावकं मुक्तं कुरु।

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द व्हाट्सएप्प करें। आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

**विशेषः**– अत्र बालकस्य सर्वदमनस्य बालस्वभावस्य, चञ्चलतायाः, बालक्रीडायाश्च स्वाभाविकं यथार्थञ्च चित्रणं वर्तते।

**5.** अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु– 3

1. 'जयतु सुरभारति' इति गीतिः कस्मात् ग्रन्थात् संकलिता?
2. करिणां कुलं को हन्ति?
3. बालकः सर्वदमनः कस्य सकाशं गन्तुम् इच्छति?
4. कीदृशैः तृणैः मत्तदन्तिनः बध्यन्ते?
5. अस्माभिः कुत्र सञ्चरणीयम्?
6. स्वामि केशवानन्दस्य मातापित्रोः नाम किम्?
7. भारतवसुधा केः पूज्या अस्ति?
8. भारतं हिमालयात् आरभ्य कुत्र पर्यन्तम् अस्ति?

**उत्तरम् :**

1. 'जयतु सुरभारति' इति गीतिः 'मधुच्छन्दा' इति गीति–संग्रहात् संकलिता।
2. करिणां कुलं सिंहः हन्ति।
3. बालकः सर्वदमनः मातुः सकाशं गन्तुम् इच्छति।
4. गुणत्वमापन्नैः तृणैः मत्तदन्तिनः बध्यन्ते।
5. यत्र बन्धु जनाः गहनारण्ये च घनान्धकारे गह्वरे स्थिताः सन्ति तत्र सञ्चरणीयम्।
6. स्वामि केशवानन्दस्य पितुः नाम ठाकुरसी ढाका मातृः नाम च साराँ इत्यासीत्।
7. भारतवसुधा मुनिजनदेवैः पूज्या अस्ति।
8. भारतं हिमालयात् आरभ्य इन्दु–सागरपर्यन्तम् अस्ति।

**निर्देशः प्रश्न संख्या 6–9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु–**

**6.** जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। 1

**उत्तरम् :**

जननी जन्मभूमिश्च कस्माद् अपि गरीयसी?

**7.** भगवती सुरभारती नवरसैः मधुरा अस्ति। 1

**उत्तरम् :**

भगवती सुरभारती कतिभिः रसैः मधुरा अस्ति?

**8.** नन्दामि मेघान् गगने विलोक्य। 1

**उत्तरम् :**

गगने कान् विलोक्य नन्दामि?

**9.** सः गुरुग्रन्थस्योत्तमः पाठी अभूत्। 1

**उत्तरम् :**

सः कस्य उत्तमः पाठी अभूत्?

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु। 3

**उत्तरम् :**

1. खलः सर्षपमात्राणि परिच्छिद्राणि पश्यति।
   आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति।।
2. शोकाराति–परित्राणं प्रीतिविस्रम्भभाजनम्।
   केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम्।।

**11.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु–

सतां जनानां संगतिः सत्संगतिः कथ्यते। मानवः यादृशैः जनैः सह वसति तादृशः एव भवति। सज्जनानां सम्पर्केण मनुष्यः सज्जनः भवति उन्नतिं महत्पदं च अलंकरोति। दुर्जनानां संगत्या मनुष्यो दुर्जनो भवति, पतनं विनाशं च प्राप्नोति। अतः मनुष्यस्योपरि संगतेः महान् प्रभावो भवति। बाल्यकाले विशेषतो बालकस्योपरि संसर्गस्य प्रभावो भवति। ये यादृशैः बालकैः सह उपविशन्ति। उत्तिष्ठन्ति, खादन्ति, पिबन्ति च ते तथैव स्वभावं धारयन्ति। अतः बाल्यकाले दुर्जनैः सह संगतिः कदापि न करणीया।

सज्जनानां संगत्या मनुष्यः उन्नतिं प्राप्नोति। तस्य विद्या कीर्तिश्च वर्धेते। दुर्जनानां संसर्गेण बहवः हानयः भवन्ति, यथा–दुर्जनसंसर्गेण मनुष्योऽसद्वृत्तो भवति, दुर्विचारयुक्तो भवति, तस्य बुद्धिर्दूषिता भवति, अतः बुद्धिः क्षीयते मनुष्यः दुर्व्यसनग्रस्तो भवति। अतस्तस्य शरीरं क्षीणं निर्बलं च भवति। तस्य कीर्तिः नश्यति, सर्वत्रानादरो भवति।
अतः स्वयशोवृद्धये ज्ञानवृद्धये सुखस्य शान्तेश्च प्राप्त्यर्थं सर्वैरपि सर्वदा सत्संगतिः करणीयाः दुर्जनसंगतिः सदा परिहर्तव्या।

1. अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु– 1
2. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) केषां सम्पर्केण मनुष्यः सज्जनः भवति? 1
   (ख) बाल्यकाले कैः सह संगतिः कदापि न करणीया? 1
   (ग) का सत्संगतिः कथ्यते? 1
   (घ) दुर्जनानां संगत्या मनुष्यः किम् प्राप्नोति? 1
   (ङ) कस्य संसर्गेण मनुष्योऽसद्वृत्तो भवति? 1
3. यथानिर्देशं प्रश्नान् उत्तरतु–
   (क) "ये यादृशैः बालकैः सह उपविशन्ति" इत्यस्मिन् वाक्ये क्रियापदं किम्? 1
   (ख) 'सज्जनानाम्' इतिपदस्य अनुच्छेदे विलोमपदं किम् प्रयुक्तम्? 1
   (ग) 'तस्य कीर्तिः नश्यति' इत्यस्मिन् वाक्ये सर्वनामपदस्थाने संज्ञापदं किम्? 1
   (घ) 'क्षीणं शरीरम्' इति पदयोः विशेष्यम् किम्? 1

**उत्तरम् :**

1. सत्संगतेः महत्त्वम्।
2. (क) सज्जनानाम्।
   (ख) दुर्जनैः।
   (ग) सतां जनानां संगतिः सत्संगतिः कथ्यते।
   (घ) दुर्जनानां संगत्या मनुष्यः पतनं विनाशं च प्राप्नोति।
   (ङ) दुर्जनसंसर्गेण मनुष्योऽसद्वृत्तो भवति।
3. (क) उपविशन्ति।
   (ख) दुर्जनानाम्।
   (ग) दुर्जनस्य।
   (घ) शरीरम्।

**12.** अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखतु–

1. प्रत्येक 1
2. मुनिरयम् 1

**उत्तरम् :**

1. प्रति + एक (यण् संधि)
2. मुनिः + अयम् (रूत्वं विसर्ग संधि)

**13.** अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखतु–

1. सत् + गतिः 1
2. देवः + अस्ति 1

**उत्तरम् :**

1. सद्गतिः (जश्त्व संधि)

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

2. देवोऽस्ति (उत्वं विसर्ग संधि)

**14.** अधोलिखितवाक्येषु रेखांकितसमस्तपदानां विग्रहं अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत–

1. वनस्य समीपम् एकः सरोवरः अस्ति। 1
2. नीलं च तत् कमलम् अत्र विभाति सरोवरे। 1
3. रामलक्ष्मणौ सीतया सह वनं गतौ। 1

**उत्तरम् :**

1. उपवनम्, अव्ययीभावसमासः
2. नीलकमलम्, कर्मधारयसमासः
3. रामश्च लक्ष्मणश्च, द्वन्द्वसमासः।

**15.** निम्नलिखितवाक्येषु रेखांकितपदेषु प्रयुक्तविभक्तिं तत् कारणं च लिखत–

1. दुर्जनं धिक्। 1
2. सः तस्मात् जुगुप्सते। 1
3. भवनस्य उपरि पताका अस्ति। 1

**उत्तरम् :**

1. द्वितीया–विभक्तिः, 'धिक्' योगे।
2. पंचमी–विभक्तिः, 'जुगुप्सा' पदयोगे।
3. षष्ठी–विभक्तिः, 'उपरि' पदयोगे।

**16.** कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।

1. न्यायाधीशेन न्यायः ..........। (कृ + अनीयर्) 1
2. यमुना .......... नदी अस्ति। (निर्मल + टाप्) 1

**उत्तरम् :**

1. करणीयः।
2. निर्मला।

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु–

1. सा बालिका धन्या अस्ति। 1
2. मानवता सदैव रक्षितव्या। 1

**उत्तरम् :**

1. धन्य + टाप्।
2. रक्ष् + तव्यत्।

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु–

| **मञ्जूषा–** बहिः, सहसा, वृथा, एव |
|---|

1. वयं .......... कार्यं न कुर्याम। 1
2. कृष्णः .......... उद्याने न भ्रमति। 1
3. कोटरात् .......... सर्पः आगच्छति। 1

**उत्तरम् :**

1. वयं सहसा कार्यं न कुर्याम।
2. कृष्णः वृथा उद्याने न भ्रमति।
3. कोटरात् बहिः सर्पः आगच्छति।

**निर्देशः– प्रश्नसंख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु–**

**19.** सः वृक्षान् पश्यति। 1

**उत्तरम् :**

तेन वृक्षाः दृश्यन्ते।

**20.** नरेण नगरं गम्यते। 1

**उत्तरम् :**

नरः नगरं गच्छति।

**21.** आवां लज्जावहे। 1

**उत्तरम् :**

आवाभ्याम् लज्यते।

**22.** घटिकाचित्रं सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु–




1. प्रातः ........... वादने श्लोकप्रतियोगितायाः उद्घाटनम्। 1
2. मध्याह्नेः .......... वादने निर्णयस्य घोषणा। 1

**उत्तरम् :**

1. प्रातः सार्धदश–वादने श्लोकप्रतियोगितायाः उद्घाटनम्।
2. मध्याह्नेः पादोनैक–वादने निर्णयस्य घोषणा।

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–

1. शिष्यौ गुरुन् नमन्ति। 1
2. ते बालिकाः क्रीडन्ति। 1
3. सा फलं खादामि। 1

**उत्तरम् :**

1. शिष्याः गुरुन् नमन्ति।
2. ताः बालिकाः क्रीडन्ति।
3. सा फलं खादति।

**24.** भवती राजकीय माध्यमिक विद्यालय गंगापुर नगरम् इत्यस्थ दशमकक्षायाः दर्शिका नामक छात्रा अस्ति भवत्या सखीं प्रतिभाम् एकं पत्रं लिखत् यस्मिन 'मम विद्यालय मह्यम् अत्यधिकं रोचते' इति वर्णनं स्यात्। 4

**उत्तरम् :**

प्रिये सखि प्रतिभे!

सादरं वन्दे।

अत्र सर्वगतं कुशलम् अस्ति। भवती अपि तत्र कुशलिनी इत्यहं मन्ये। अद्य चिरात् प्राप्तम् भवत्याः स्नेहसिक्तं पत्रम्। भवती इच्छति यद् अहं मम विद्यालयस्य विषये भवतीं प्रति लिखेयम्। निःसंशयोऽयं मम विद्यालयः मह्मम् अत्यधिक रोचते यतः अस्य भवनम् अतिविस्तृतं, भव्यम्, सुसज्जितं द्विभूमिकं च। अस्य पुस्तकालये बहूनि पुस्तकानि सन्ति, वाचनालये विविधाः नूतनाः पत्र–पत्रिकाः च समायान्ति। अत्र पठन–पाठनस्य क्रीडायाः च सम्यग् व्यवस्था अस्ति। एष एकः सुव्यवस्थितः, सम्यगनुशासितः प्रशासितश्च आदर्शविद्यालयः अस्ति। अतः अयं मम विद्यालयः मह्मम् अत्यधिकं रोचते। शेषं कुशलम्। पित्रोः चरणयोः प्रणत्यः मनीषायै च स्नेहः निवेद्यताम्।

भवत्याः प्रियसखी
दर्शिका

**अथवा**

**24.** शुल्कमुक्त्यर्थं प्रार्थनापत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयत– 4

| **मञ्जूषा–** वृद्धोऽस्ति, भवदाज्ञाकारी, विद्यालयास्य, अर्जनमेव, दशम् कक्षायाः, परिवारस्य, परीक्षायाम्, प्रदातुम्। |
|---|

सभी गुरुजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द व्हाट्सएप्प करें। आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

सेवायाम्
श्रीमन्तः प्रधानाध्यापक महोदयः
महाराजा बदनसिंह उ.प्रा. विद्यालयः,
भरतपुरम्।

**विषय–** शिक्षणशुल्कमुक्तये प्रार्थना-पत्रम्।

महोदयः,
सविनयं प्रार्थये यदऽहं श्रीमन्तः विद्यालये ............ छात्रोऽस्मि। मम ............ पितुः ............ आर्थिकस्थितिः शोचनीयाऽस्ति। मम पिता .......... प्रतिदिवसं कार्ये केवलं पञ्चाशद् रुप्यकाणाम् ........... भवति। तेन ........... पालन-पोषणञ्च कथमपि भवितुं न शक्नोति। अतः अहं ............ शिक्षणशुल्कं ............ असमर्थोऽस्मि। गतवर्षे मम शिक्षणशुल्क-मुक्तिः आसीत्। नवम् कक्षायाः ............ अहं प्रथमश्रेण्याम् उत्तीर्णोऽभवम्।
अतः पुनः निवेदनमस्ति यत् भवन्तः अध्ययने मम रूचिं विलोक्य मह्यं शिक्षणशुल्कात् मुक्तिं प्रदाय अनुग्रहीष्यन्ति।
............ शिष्यः
दिनांकः– 05-07-20.... सुरेशचन्द्रः
कक्षा 10 (स)

**उत्तरम् :**
सेवायाम्
श्रीमन्तः प्रधानाध्यापक महोदयः
महाराजा बदनसिंह उ.प्रा. विद्यालयः,
भरतपुरम्।

**विषय–** शिक्षणशुल्कमुक्तये प्रार्थना-पत्रम्।

महोदयः,
सविनयं प्रार्थये यदऽहं श्रीमन्तः विद्यालये दशम् कक्षायाः छात्रोऽस्मि। मम पितुः आर्थिकस्थितिः शोचनीयाऽस्ति। मम पिता वृद्धोऽस्ति प्रतिदिवसं कार्ये केवलं पञ्चाशद् रुप्यकाणाम् अर्जनमेव भवति। तेन परिवारस्य पालन-पोषणञ्च कथमपि भवितुं न शक्नोति। अतः अहं विद्यालयास्य शिक्षणशुल्कं प्रदातुम् असमर्थोऽस्मि। गतवर्षे मम शिक्षणशुल्क-मुक्तिः आसीत्। नवम् कक्षायाः परीक्षायाम् अहं प्रथमश्रेण्याम् उत्तीर्णोऽभवम्।
अतः पुनः निवेदनमस्ति यत् भवन्तः अध्ययने मम रूचिं विलोक्य मह्यं शिक्षणशुल्कात् मुक्तिं प्रदाय अनुग्रहीष्यन्ति।
भवदाज्ञाकारी शिष्यः
दिनांकः– 05-07-20.... सुरेशचन्द्रः
कक्षा 10 (स)

**25.** मंजूषायाः उपयुक्तपदानि गृहीत्वा रुग्णः-वैद्यः मध्ये संवादं पूरयतु। 4

| |
|---|
| **मञ्जूषा–** कासरोगी, सत्यम्, कासति, कुक्कुराः, चौराणां, गुणाः, दधिसेवनम्, गुणः, सम्यक्, तत्कथम्। |

**रुग्णः** – भो वैद्य! औषधं यच्छ, परन्तु अहं .......... न त्यक्ष्यामि।
**वैद्यः** – चिन्ता मा अस्तु। दधिसेवने बहवः ..........।
**रुग्णः** – किं .......... इदम्? के च ते गुणाः?
**वैद्यः** – ........... यदि दधि सेवते, तस्य गृहं चौराः न प्रविशन्ति।
**रुग्णः** – दधिसेवनेन सह .......... कः सम्बन्धः?
**वैद्यः** – दधिसेवी कासरोगी सर्वां रात्रिं .......... एव, जागर्ति कुतः चौरभयम्।
**रुग्णः** – कस्तावत् अन्यः ..........?
**वैद्यः** – ........... तं न दशन्ति।

**उत्तरम् :**
**रुग्णः** – भो वैद्य! औषधं यच्छ, परन्तु अहं दधिसेवनं न त्यक्ष्यामि।
**वैद्यः** – चिन्ता मा अस्तु। दधिसेवने बहवः गुणाः।
**रुग्णः** – किं सत्यम् इदम्? के च ते गुणाः?
**वैद्यः** – कासरोगी यदि दधि सेवते, तस्य गृहं चौराः न प्रविशन्ति।
**रुग्णः** – दधिसेवनेन सह चौराणां कः सम्बन्धः?
**वैद्यः** – दधिसेवी कासरोगी सर्वां रात्रिं कासति एव, जागर्ति कुतः चौरभयम्।
**रुग्णः** – कस्तावत् अन्यः गुणः?
**वैद्यः** – कुक्कुराः तं न दशन्ति।

**26.** अधोलिखितषड्वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु– 4
1. तालाब में कमल खिलते हैं।
2. सूर्य पूरब में उगता है।
3. मुझे मिठाई अच्छी लगती है।
4. राम के साथ सीता वन गई।
5. दशरथ अयोध्या के राजा थे।
6. पटना बिहार की राजधानी है।

**उत्तरम् :**
1. तडागे कमलानि प्रस्फुटन्ति।
2. सूर्यः पूर्वस्यां उदेति।
3. मह्यं मिष्टान्नं रोचते।
4. रामेण सह सीता वनं गतवती।
5. दशरथः अयोध्यायाः नृपः आसीत्।
6. पाटलिपुत्रं बिहारस्य राजधानी अस्ति।

**27.** अधः चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया संस्कृते षट् वाक्यानि रचयतु– 3
राजमार्गस्य चित्रम् वाहनानि
शीघ्रं गृहं भारयुक्तवस्तूनि
प्रेषयितुं शक्नुवन्ति दुर्घटनाः
सावधानेन चालयामः सम्भावनाः




**उत्तरम् :**
1. इदं राजमार्गस्य चित्रम् अस्ति।
2. राजमार्गे विविधानि वाहनानि चलन्ति।
3. जनाः शीघ्रं गृहं गन्तुं द्रुतगत्या वाहनानि चालयन्ति।
4. असावधानतया वाहनचालनेन दुर्घटनायाः सम्भावनाः भवन्ति।
5. राजमार्गे भारयुक्तवस्तूनि नीत्वा वाहनं न चालयेत्।
6. राजमार्गे सड़कसुरक्षार्थं सावधानेन वाहनानि चालयामः।

**अथवा**

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

**27.** अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखत– 3

> **मञ्जूषा–** महत्वम्, अनुशासनस्य, परमावश्यकम्, देशः, जना लभते, ।

.......... मानव–जीवने विशिष्टं .......... अस्ति। अनुशासेन .......... महान् भवति। छात्रजीवने अनुशासनं .......... अस्ति। अनुशासनेन विना साफल्यं न ..........। अनुशासिताः .......... प्रशंसनीयाः। अतः अस्माभिः अनुशासिताः भवितव्यम्।

**उत्तरम् :**

अनुशासनस्य मानव–जीवने विशिष्टं महत्वम् अस्ति। अनुशासेन देशः महान् भवति। छात्रजीवने अनुशासनं परमावश्यकम् अस्ति। अनुशासनेन विना साफल्यं न लभते। अनुशासिताः जनाः प्रशंसनीयाः। अतः अस्माभिः अनुशासिताः भवितव्यम्।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु– 3

1. सभायां मूषकाः इयं निर्णयम् अकुर्वन् यत् यदि विडाल्याः ग्रीवायां घण्टिकाबन्धनं भविष्यति तदा तस्या नादं श्रुत्वा वयं स्वबिलं गमिष्यामः।
2. सा प्रतिदिनं बहून् मूषकान् अभक्षत्।
3. कस्मिंश्चित् ग्रामे एका विडाली अवसत्।
4. तदानीम् एव विडाली आगता। तां दृष्ट्वैव सर्वे मूषकाः स्वबिलं पलायिताः।
5. एवं श्रुत्वा तेषु मूषकेषु एकः वृद्धः मूषकः कञ्चित् विचारयन् तान् अपृच्छत्– 'कः तस्याः ग्रीवायां घण्टिकाबन्धनं करिष्यति'?
6. एवं स्वविनाशं दृष्ट्वा मूषकाः स्वप्राणरक्षार्थम् एकां सभां आयोजितवन्तः।

**उत्तरम् :**

1. कस्मिंश्चित् ग्रामे एका विडाली अवसत्।
2. सा प्रतिदिनं बहून् मूषकान् अभक्षत्।
3. एवं स्वविनाशं दृष्ट्वा मूषकाः स्वप्राणरक्षार्थम् एकां सभां आयोजितवन्तः।
4. सभायां मूषकाः इयं निर्णयम् अकुर्वन् यत् यदि विडाल्याः ग्रीवायां घण्टिकाबन्धनं भविष्यति तदा तस्या नादं श्रुत्वा वयं स्वबिलं गमिष्यामः।
5. एवं श्रुत्वा तेषु मूषकेषु एकः वृद्धः मूषकः कञ्चित् विचारयन् तान् अपृच्छत्– 'कः तस्याः ग्रीवायां घण्टिकाबन्धनं करिष्यति'?
6. तदानीम् एव विडाली आगता। तां दृष्ट्वैव सर्वे मूषकाः स्वबिलं पलायिताः।

*******

सत्र 2020–21 से नये पाठ्यक्रमानुसार सभी कक्षाओं के सभी विषयों की टेक्स्ट बुक एवं सभी प्रकार की सहायक अध्ययन सामग्री विद्यार्थियों को मोबाइल पर व्हाट्सएप द्वारा एवं वेबसाइट www.rbse.online पर उपलब्ध करवायी जाएगी। इसके लिये विद्यार्थियों से किसी भी प्रकार का कोई शुल्क नहीं लिया जाएगा। इसके लिये विद्यार्थियों को किसी भी प्रकार का कोई OTP Verification या Email द्वारा Verification नहीं देना होगा। हमारा व्हाट्सएप नम्बर जानने या अन्य किसी भी प्रकार की जानकारी के लिये वेबसाइट www.rbse.online पर विजिट करें।

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द व्हाट्सएप्प करें। आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।